११. भारतीयदर्शनानां महत्त्वं वैशिष्ट्यं च

दर्शन-शब्दार्थः— प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे) ल्युट्-प्रत्यये कृते दर्शन-शब्दो निष्पद्यते। किं नाम दर्शनम्? दृश्यते अनेन इति दर्शनम्। येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, प्रकृतिश्च, याथातथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शन-शब्दान्तर्गतं भवति। किं ब्रह्म? तस्य किं स्वरूपम्? क ईश्वरः? के तस्य प्राप्तेरुपायाः? अस्मिन् जगति किं शाश्वतं तत्त्वम्? इयं सृष्टिः कुत आबभूव? जीवात्मनः किं स्वरूपम्? कः पुनर्जायते? किं लिङ्गशरीरम्? जीवस्य कुत उद्भूतिः? किं तस्य लक्ष्यम्? कथं मोक्षावाप्तिः? आत्मा चेतनोऽचेतनो वा? कः सृष्टेः कर्ता? किं जीवनस्य कर्तव्यम्? कश्च जीवनस्य साधिष्ठः पन्थाः? इत्यादयोऽनुयोगा यत्र सुसूक्ष्मेण रूपेण विविच्यन्ते तद् दर्शनम्। सूक्ष्मेक्षिकया तत्त्वार्थदर्शनमेव दर्शनम् इत्यवगन्तव्यम्। यथोच्यते:—

केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तः।
केनेषितां वाचमिमां वदन्ति, चक्षुः श्रोत्रं क उ देवो युनक्ति॥

(केन उप० १.१)

भारतीयदर्शनानां वर्गीकरणम्— भारतीयदर्शनानि स्थूलरूपेण द्विधा विभज्यन्ते— आस्तिकदर्शनानि, नास्तिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यम् उरीकुर्वन्ति, तानि आस्तिकदर्शनानीति व्यवह्रियन्ते। यानि च वेदानां प्रामाण्यं नोररीकुर्वते तानि नास्तिकदर्शनानि। तत्र न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानि अभिधीयन्ते। चार्वाक-जैन-बौद्धदर्शनानि च नास्तिकदर्शनानि निर्दिश्यन्ते। विभाजनं चैतद् वेदानां प्रामाण्याप्रामाण्यमूलकमेवेति सम्यग् अवधारणीयम्।

भारतीयदर्शनानां महत्त्वम्— मोदावहम् एतद् यद् निखिलेऽपि भुवने पाश्चात्त्याः पौरस्त्याश्च विपश्चितो भारतीयदर्शनानां मुक्तकण्ठेन एकस्वरेण च महत्त्वं स्वीकुर्वते। सत्यपि मतभेदे, सत्यपि राष्ट्रीयपक्षपाते, सत्यपि स्वोत्कर्षविचारे च भारतीयदर्शनानां महत्त्व-विषये न कस्यापि विदुषो विप्रतिपत्तिः। विश्ववाङ्मये भारतीयदर्शनानि ज्ञान-प्रभा-भास्वरेण चिन्तनेन, स्व-पर-पक्षालोचन-निपुणेन वैदुष्येण, तत्त्वार्थग्रहणैकप्रवणेन विवेकेन, अधृष्येण धीप्रकर्षेण, संकीर्णतादोषानवलिप्तेन विवेचनेन, पूर्वग्रहरहितेन विश्लेषणेन, मनोज्ञया विवेचनशैल्या, हृद्यया भावाभिव्यक्त्या, रुचिरया पदावल्या च तरणिवत् तेजः-समुच्चयेन चकासति।

भारतीयदर्शनानां वैशिष्ट्यम्— भारतीयदर्शनानां चिन्तनपद्धतिरेव पाश्चात्त्य-दर्शनेभ्यो भिन्ना। पाश्चात्यदर्शनेषु दर्शनानाम् उद्भवविषये विविधा वादाः प्रस्तूयन्ते,

तद्यथा—आश्चर्यजन्यत्वम्, सन्देहमूलकत्वम्, मानव-व्यवहाराध्ययनमूलकत्वम्, ज्ञानानुरागमूलकत्वं वा। परं भारतीयदर्शनानां मूलम् आश्चर्यादिकं नास्ति। तस्य मूलं त्रिविधदुःखात्यन्तनिवृत्तिरस्ति। त्रिविध-दुःखात्यन्तनिवृत्तिश्च अध्यात्मज्ञानेन आध्यात्मिक-प्रवृत्त्या वा भवतीति भारतीयविज्ञानां सम्मतम्।

दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ।
दृष्टे साऽपार्था चेत् नैकान्तात्यन्ततोऽभावात्॥ (सांख्यकारिका १)

सांख्यानुसारं च 'व्यक्ताव्यक्तज्ञविज्ञानाद्' दुःखात्यन्तनिवृत्तिः संजायते।

(१) अध्यात्मभावना-प्राधान्यम्— भारतीयदर्शनेषु अध्यात्म-भावना अनुस्यूता ओता प्रोता च। आध्यात्मिकीं भावनां परिहाय दर्शनानां स्थितिरेव न सम्भाव्यते। किम् आत्मतत्त्वम्? कथं च तदवाप्तिः? इति सर्वेषामेव दर्शनानां प्रमुखः चिन्तनविषयः। आत्मज्ञानम्, आत्मसाक्षात्कारः, ब्रह्मणा तादात्म्यानुभूतिः, तन्मूलकं च सर्वज्ञत्वम्, इत्यादयो विषया दर्शनानां विवेच्यत्वेनोपतिष्ठन्ते।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्। (बृहदा० २.४.५)

(२) धर्मानुबन्धित्वम्—पाश्चात्यदर्शनेषु धर्मदर्शनयोर्वैयधिकरण्यम्, न तु सामानाधिकरण्यम्, स्वीक्रियते। तत्र धर्मदर्शनयोः पन्थानौ विभिन्नौ, अनपेक्षित्वं चेतरेतरयोः। भारतीयदर्शनेषु तयोः सामानाधिकरण्यं परस्परापेक्षित्वं चाङ्गीक्रियते। यदेव दर्शनेन विविच्यते, तदेव धर्मेण व्यवह्रियते। एकत्र धर्मतत्त्वसमीक्षा, अपरत्र धर्मतत्त्वव्यवहृतिः। दर्शने चिन्तनं मुख्यम्, धर्मे च कर्मनिर्धारणम्। एवं परस्परानुबद्धे धर्मदर्शने भोगापवर्गयोः सोपानरूपे स्तः। एतदेव कणादेन पतञ्जलिना चोद्घोष्यतेः—

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। (वैशेषिक०)
भोगापवर्गार्थं दृश्यम्। (योगदर्शन २.१८)

(३) वेदानां प्रामाण्यम्— भारतीयदर्शनेषु षड् आस्तिकदर्शनानि वेदानां प्रामाण्यं स्वीकुर्वते। जैन-बौद्धदर्शनयोरपि वेदानां प्रामाण्यं रूपान्तरेण व्यवहारबुद्ध्या वा स्वीक्रियते एव। केवलं चार्वाकदर्शनं वेदानाम् अप्रामाण्यं प्रस्तौतितराम्।

(४) दुःखत्रयविनाशनम्— भारतीयदर्शनेषु आध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रिविधदुःखानाम् आत्यन्तिकवारणाय दर्शनानां जनिरभूत्। एतदेव च दर्शनानां लक्ष्यम्। एतच्च पतञ्जलिना प्रकार-चतुष्टयेन स्फुटीक्रियतेः—(क) हेयम्-दुःखं हेयं त्याज्यं वा। (ख) हेयहेतुः-किमिति दुःखानि हेयानि? (ग) हानम्-दुःखानां शाश्वतिकोऽभावः। (घ) हानोपायः-दुःखप्रणाशस्य के उपायाः? एवं विविच्य दुःखप्रणाशोपाया दर्शनैः प्रस्तूयन्ते।

(५) कर्मफलस्यानिवार्यत्वम्--- कृतं क्रियमाणं करिष्यमाणं च कर्म फलभाग्

भवति। कृतकर्मणां विपाकरूपेण विविधयोनिषु उच्चावचकुलादिषु च जन्म भवति। 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इति भारतीयदर्शनानां मतम्। अतः कर्मविशुद्धौ आचारशुद्धौ च बलम् आधीयते तज्ज्ञैः।

(६) पुनर्जन्मनः स्वीकरणम्—चार्वाकव्यतिरिक्तानि भारतीयदर्शननानि कर्मफलानुसारं मानवस्य पुनर्जन्म स्वीकुर्वन्ति।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। (गीता २.२७)

(७) मानवजीवनान्वयित्वम्—भारतीयदर्शनानि आचारमीमांसायां मानवस्य कर्तव्याकर्तव्यानां विशदं विवेचनं प्रस्तुवन्ति। किं कर्तव्यम्? किम् अकर्तव्यम्? कथम् अभ्युदयः? कथम् अवनतिः? मानवजीवनस्य समस्यानां कथं निरोधः प्रतिकारो वा विधेयः इत्यादयो जीवनसंबद्धा अनुयोगा दर्शनैः समाधीयन्ते।

(८) चारित्रिकोन्नतेर्महत्त्वम्—भारतीयदर्शनेषु चारित्रिकोन्नतौ महद् बलम् आधीयते। आस्तिकानि नास्तिकानि चोभयान्यपि दर्शनानि चारित्रिकीं विशुद्धिम् उन्नतिं च जीवनस्यावश्यकर्तव्यत्वेन उपन्यस्यन्ति। 'सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते' (गीता २-३४)।

(९) अज्ञानस्य बन्धनकारणत्वम्—जीवोऽज्ञानवशगो भूत्वा बन्धनम् आपद्यते। स भूयो-भूयो जायते म्रियते च। अज्ञाननाशम् अन्तरेण जन्म-मृत्यु-बन्धनाद् न हि मुच्यते जीवः।

(१०) मोक्षस्य जीवनलक्ष्यत्वम्—मोक्षो मुक्तिर्निर्वाणं वा जीवनस्य परमं लक्ष्यम्। मोक्षमधिगत्यैव जीवः स्वजीवनस्य चरमम् उद्देश्य विन्दति। ज्ञानाग्निना सर्वकर्मणां विनाशे आत्मसाक्षात्कारे च मोक्षावाप्तिः संजायते।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ (गीता ४.३७)
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ (वेदान्तसार)

(११) स्वतन्त्रास्तित्वम्—पाश्चात्यदर्शनानि राजनीति-धर्मशास्त्र-समाजशास्त्र-आचारशास्त्रादीनाम् अङ्गरूपेण समुद्भूतानि वर्तन्ते, परं भारतीयदर्शनानां समुदयो वैदिककालाद् आरभ्य स्वतन्त्रचिन्तनरूपेणाभवत्। अतोऽस्य स्वतन्त्रम् अस्तित्वं विद्यते। मुण्डकोपनिषदि ब्रह्मविद्या सर्वविद्याऽऽधारत्वेन परिगण्यते।

स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम् अथर्वाय ज्येष्ठपुत्राय प्राह। (मु० १.१)

(१२) कालाविच्छिन्नत्वम्—भारतीयदर्शनानि वैदिककालाद् आरभ्य अद्यावधि अविच्छिन्नरूपेण प्रवहन्ति। सेयं दर्शनधारा पुण्यसलिलाया भागीरथ्या धारेवाविच्छिन्ना भारते विराजते। पाश्चात्यदर्शनानाम् ईसवीयसंवत्सरात् सप्तमशताब्दीपूर्वं प्रसृताऽपि धारा काले काले विच्छेदमाप, पुनरुद्भूता च।

(१३) विचार-स्वातन्त्र्यम्— भारतीयदर्शनेषु विचारस्वातन्त्र्यं प्रतिपदम् उपलभ्यते। खण्डनं मण्डनं वा स्यात्, हेयम् उपादेयं वा स्यात्, विरुद्धम् अविरुद्धं वा स्यात्, यदि युक्तियुक्तं विचारपूर्णं वा किंचिद् उपस्थाप्यते तद् विदुषां विचारपथम् आरोहति। न पूर्वग्रहमात्रेण किंचित् तिरस्क्रियते।

(१४) व्यापकम् ईक्षणम्— सत्यान्वेषणं दर्शनानां लक्ष्यम्। अतो न भारतीय-दर्शनेषु संकुचिता दृष्टिरुपलभ्यते। अस्वीकार्यमपि परपक्षं सयुक्तिकं समुपस्थाप्य युक्ति-प्रमाणपुरःसरं तन्निराकरणं क्रियते।

(१५) अनुभूतिमूलकत्वम्— भारतीयदर्शनानि स्वानुभूतिजन्यानि विद्यन्ते। सर्व-त्रैवानुभूतेः प्राधान्यं वरीवर्ति। 'आत्मानं विद्धि' इत्याश्रित्य स्वानुभूतीनां प्रकाशनं दर्शनेषूपलभ्यते।

(१६) विवेचन-प्राधान्यम्— भारतीयदर्शनेषु विवेचनात्मकतायाः प्राधान्यं लक्ष्यते। यदेव किंचित् प्रतिपाद्यं स्यात् तत् सयुक्तिकं सप्रमाणं परीक्ष्यैव हेयम् उपादेयं वा जायते, न प्रतिज्ञामात्रेण। अत एव भारतीयदर्शनानि दर्शन-जगति रत्नवद् बहुमूल्यानि आकल्यन्ते।

(१७) समाजोत्थापन-भावना— भारतीयदर्शनेषु समाजस्य संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन सामाजिकी सांस्कृतिकी च समुन्नतिः संभाव्येत। अतएवानेके दर्शनकाराः समाजसुधारकरूपेण प्रथिताः सन्ति।

(१८) समन्वयभावना संश्लेषणात्मकत्वं च— भारतीयदर्शनेषु समन्वयभावना प्रमुखा वर्तते। विविधानि दर्शनानि एकस्यैव पादपस्य विविधशाखारूपेण परिगण्यन्ते, तत्र समन्वयश्चावलोक्यते। दर्शनेषु विविधविज्ञानानाम् एकत्रावस्थापनस्य समीकरणस्य च प्रयासो निरीक्ष्यते।

एवं भारतीयदर्शनानि विवेचनगाम्भीर्येण, आलोचनाचातुर्येण, गूढार्थनिरीक्षणेन, संवेदनशीलानुभूतिप्रकर्षेण, सत्यान्वेषणानुरागित्वेन, तत्त्वार्थग्रहणप्रवणेक्षणेन, समन्वय-भावनया, मनःस्थित्यनुशीलनेन, अतीतानुरागित्वेन, अध्यात्माभिमुख्येन, पुरुषार्थचतुष्टय-साधकत्वेन, जीवनोन्नायकत्वेन, दुःखत्रयविनाशपूर्वक-ब्रह्मसाक्षात्कारकरणत्वेन समेषामपि सुधियां समादृतिं समधिगच्छन्ति।

●